# खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।

त्यागराज-मुत्तुस्वामिदीक्षित-श्यामशास्त्रिप्रमुखाः सङ्गीतज्ञाः कर्णाटकसङ्गीतलोके प्रसिद्धाः। एतेषु त्यागराजः प्रातस्स्मरणीयः। अयं प्रायः द्विसहस्राधिकानां कृतीनां कर्ता भवति। धर्मचिन्तापराः तथा सन्मार्गोपदेशकाः भवन्ति प्रायेण त्यागराजकृतयः। हंसध्वनिरागे विरचितं वातापि गणपतिम् इति प्रसिद्धं कीर्तनं मुत्तुस्वामिदीक्षितेन विरचितम्। 'कमलाम्बाम्', 'अभयाम्बाम्' इत्यादयः दीक्षितकृतिषु प्रसिद्धाः। श्यामशास्त्रिमहाभागः अपि तिरुवारूर् देशे अजायत। माञ्चि, चिन्तामणिः इत्यादीन् रागान् स एव प्रथमं प्रयुक्तवान्। गर्भश्रीमान् इति विख्यातः स्वातितिरुनाल् महाराजोऽपि कर्णाटकसङ्गीतविदुषां मध्ये अग्रगण्यः। सः श्रीपद्मनाभस्तुतिपराणि अनेकानि कीर्त्तनानि विरचितवान्।

1. कर्णाटकसंगीतलोके प्रातस्स्मरणीयः कः ?

..................................................................।

2. त्यागराजकृतीनां विशेषताः काः ?

..................................................................।

3. मुत्तुस्वामिदीक्षितस्य प्रसिद्धं कीर्तनं किम् ?

..................................................................।

4. माञ्ची चिन्तामणि इत्यादि रागान् कः प्रथमं प्रयुक्तवान् ?

..................................................................।

5. वातापि गणपतिं.... इति कीर्तनं कस्मिन् रागे निबद्धम् ?

..................................................................।